[२४७] खच्प्रकरणे गमेः सुप्युपसङ्ख्यानम् । (म. भा. २.१०२)

मितङ्गमो हस्ती । मितङ्गमा [1]हस्तिनी ।

[२४८] विहायसो विह च । (म.भा. २.१०२)

विहायसा गच्छति विहङ्गमः ।

[२४९] खच्च डिद्वा[2] वक्तव्यः । (म. भा. २. १०३)

विहङ्गः, [3]विहङ्गमः ।

[२५०] डे च विहायसो विहादेशो वक्तव्यः । (म. भा. २. १०३)

विहगः ॥

## द्विषत्परयोस्तापेः । (३९/२९५४)

द्विषत्परयोः[4] कर्मणोरुपपदयोः तापेः धातोः खच् प्रत्ययो भवति । 'तप दाहे' (धा. पा. १८१९) चुरादिः, 'तप सन्तापे' (धा. पा. ९८६) [5]भ्वादिः, द्वयोरपि ग्रहणम् । द्विषन्तं तापयति द्विषन्तपः । परन्तपः । द्विषत्परयोः इति [6]द्वितकारको निर्देशः । तेन स्त्रियां न भवति । द्विषतीं तापयति द्विषतीतापः[7] ॥

## वाचि यमो व्रते । (४०/२९५६)

वाक्शब्दे [8]कर्मणि उपपदे यमेः धातोः खच् प्रत्ययो भवति व्रते गम्यमाने । [9]व्रत इति शस्त्रितो नियमः उच्यते । वाचंयमः आस्ते । व्रते इति किम् ? वाग्यामः ॥

## पूःसर्वयोर्दारिसहोः । (४१/२९५८)

पुर् सर्व इत्येतयोः कर्मणोः उपपदयोः यथासङ्ख्यं दारिसहोः धात्वोः खच् प्रत्ययो भवति । पुरं दारयति पुरन्दरः । सर्वंसहो [10]राजा ।

[२५१] भगे च दारेरिति वक्तव्यम् ।

[11]भगन्दरः ॥

## सर्वकूलाभ्रकरीरेषु कषः । (४२/२९६०)

सर्व कूल अभ्र करीर इत्येतेषु कर्मसूपपदेषु कषेः धातोः खच् प्रत्ययो भवति । [12]सर्वं कषति सर्वंकषः खलः । कूलङ्कषा नदी । अभ्रङ्कषो [13]गिरिः । करीषङ्कषा वात्या ॥

---

1. हस्तिनी नास्ति फ. 2. वा नास्ति ड. 3. विहंगमः नास्ति ड. फ. 4. इत्येतयोः इत्यधिकम् फ द्विषत् पर इत्येतयोः क. 5. भूवादिः क. 6. द्वितकारो निर्देशः फ. 7. कर्मणि अणेव भवति इत्यधिकम् क 8. कर्मवाचिनि अ. फ. 9. व्रतम् इति ड. फ. 10. राजा नास्ति क. ड. 11. भगं दारयति इत्यधिकम् फ 12. सर्वं कषति नास्ति अ. फ. 13. वायुः क.